Shri Raghunath Temple MSS. Library,
JAMMU

No. ४४९१

Title ललिता स्तव रत्नम्.

Author श्री दुर्वासः

Extent १८ Age १८८३

Subject भक्तिशास्त्रं

© Dharmartha Trust J&K. Digitized by eGangotri

ललितास्तवराजः

४४२१

4491

617 Common.

F. = 17

© Dharmartha Trust J&K. Digitized by eGangotri

॥श्रीगणेशाय नमः॥श्रीमद्गुरुभ्यो नमः॥वंदे गजेंद्रवदनं वामांकारूढवल्लभाश्लिष्टं।कुं
कुमपरागशोणं कुवलयिनीजारकोरका(अल्प)पीडं॥१॥सजयति सुवर्णशैलः सकलजगच्च
क्रसंघटितमूर्त्तिः॥कांचननिकुंजवाटीकंदल(अंकुर)दमरीप्रपंचसंगीतः॥२॥हरिहयनैऽ
ऋतमारुतहरितामंतेष्ववस्थितं तस्य।विनुमः सानुत्रितयं हरिगौरीशविधिपाधारं विधि
॥३॥मध्ये पु[illegible]मनोहररत्नरुचिस्तबकरंजितदिगंतं।उपरिचतुःशतयोजनमुत्तुंगं
शृंगपुंगव(श्रेष्ठ)मुपासे॥४॥तत्र चतुःशतयोजनपरिणाहं देवशिल्पिना रचितं।नानासा
लमनोज्ञं नमाम्यहं नगरमादिविद्यायाः॥५॥प्रथमं सहस्रपूर्वषट्शतसंख्याकयो क
जनं परितः।वलयीकृतस्वगात्रं वरणं शारणं व्रजाम्ययोरूपं॥६॥तस्योत्तरे समीर
णयोजनदूरे तरंगितच्छायः।घटयतु मुदं द्वितीयो घंटास्वनसारनिर्मितः(मिलः) सालः

© Dharmartha Trust J&K. Digitized by eGangotri

॥७ नयोरंतरसीमन्युद्दामभ्रमरसिंजितोदारं (विचित्रित) । उपवनमुपास्महे यं (नयम्) दूरीकृतमंदमा
रुतस्पंदं ॥८॥ आलिंग्य भद्रकालीमासीनस्तत्र [illegible] हरिशिलाश्यामां । मनसिमहाकाले
मेविहरतु मधुपानविभ्रमन्नेत्रः ॥९॥ तात्तीयको [illegible] वरणस्तस्योत्तरसीम्नि वातयोजन
तः । ताम्रेण रचितमूर्त्तिस्तनुतां माचंद्रतारकं भद्रं ॥१०॥ मध्येतयोर्मणिमयपल्लवश्या
शाखाप्रसूनपक्ष्मलितां । कल्पानोकहवाटीकलयेमकरंदपंकिलावालां ॥११॥ तत्र म
धुमाधवश्रीतरुणीभ्यां तरलहृक्चकोराभ्यां । आलिंगितो वतान्मामनिशं प्रथम
र्तैरात्तपुष्पास्त्रः ॥१२॥ नमततदुत्तरभागे नाकिपथोल्लंघिशृंगसंघातं । सीसाकृतिं
तुरीयं सितकिरणालोक (प्रकाशो) निर्मलं सालं ॥१३॥ सालद्वयांतराले सरला [illegible] लिपोतचा
टुसुभगायां । सितानवाटिकायां सक्तं चेतोस्तु सततमस्माकं ॥१४॥ तत्र तपनातिरू १ क

© Dharmartha Trust J&K. Digitized by eGangotri

क्षः सम्राज्ञीचरणसंश्रितस्वांतः। शुक्रशुचिश्रीसहितो ग्रीष्मर्त्तुर्द्दिशतु कीर्त्तिमाक

ल्पं॥१५॥ उत्तरसीमनि तस्योन्नतशिखरोत्कंपिहाटकपताकः। प्रकटयतु पंचमोऽ

नः प्राकारः कुशलमारकूटमयः॥१६॥ प्राकारयोश्च मध्ये पल्लवितान्यस्त पंच

मोन्मेषा। हरिचंदनद्रुवाटी हरतादमलमस्मदनुतापं॥१७॥ तत्र नभश्रीमुख्येस्त

रुणीवर्गैः समन्वितः परितः। वज्रोद्दहासमुखरो वांछापूर्त्तिं तनोतु वर्षर्त्तुः॥१८॥ मा

रुतयोजनदूरे महनीयस्तस्य चोत्तरे नागोन्नद्धंक्रमीषः प्राकारः पंचलोहधातुमयः॥१ पङः

९॥ अनयोर्मध्ये संततमंकूरद्दिव्यकुसुमगंधायां। मंदारवाटिकायां मनसि मंगीक

रोतु मे विहर्तिं॥२०॥ तस्यामिषोर्जे लक्ष्मीतरुणीभ्यां शरदृतुः सदा सहितः। अन्यच्चेप

न्सजीयाद्दं बामामोदमेदुरैः कुसुमैः॥२१॥ तस्यर्षिसंख्ययोजनदूरे देदीप्यमानश्चं

© Dharmartha Trust J&K. Digitized by eGangotri

ललि

ोघः कैलधौतकलितमूर्त्तिः कल्याणं दिशतु सप्तमः सालः ॥२२॥ मध्येतयोर्मरुत्पथ
२ त संधीविटपाग्रविद्धघनकलशं। श्रीपारिजातवाटीक्रियमनिशं दिशतु शीतलोद्दे
शां ॥२३॥ तस्यामतिप्रियाभ्यां सहखेलन्सह सहस्यलक्ष्मीभ्यां। सामंतो हेमंतो हेमं
तो भवतु हेमवद्धेन ॥२४॥ उत्तरतस्तस्य महानुद्दटकृतमूकशिखारुणमयूखः। तप
नीयखंडरचितस्तनुतां दायुष्ममष्टमो वरणः ॥२५॥ कादंबविपिनवाटीमनयोर्मध्य
कुञ्ज४ भुवि कल्पितावासां। स्तनेयामि स्तनकोरककंदलितामोदतुंदिलसमीरां ॥२६॥ तद
स्यामतिशिशिराकृतिरासीनस्तपस्तपस्यलक्ष्मीभ्यां। शिवमनिशं कुरुतान्मे शिशि
रर्त्तुः संभीततशीतलदिगंतः ॥२७॥ तस्यां कदंबवन्यां तत्प्रसवामोदमिलितमधुगं २
धां सप्तावरणमनोज्ञशरणं समुपैमि मंत्रिणीशरणं ॥२८॥ तत्रालये विशालेतपनी

© Dharmartha Trust J&K. Digitized by eGangotri

त्त

हतिस
पारचितंतरं[illegible]सोपाने। माणिक्यमंडपांतमहिते सिंहासने मणीखचिते ॥२९॥ बिंदु-
त्रिपंचकोणद्विपनृपवसुवेददलकुरेखाढ्ये। चक्रे सदा निविष्टां षष्ठ्यष्टत्रिंशदक्षरे-
राजमातंगी तमालश्यामला
जी॥३ शानीं ॥३०॥ तापिंछमेचका[illegible]तालीदलघटितकर्णताटंकां। तांबूलपूरितमुखीं ताम्रा-
जीव नीब
धरबिंबदृष्टदरहासां ॥३१॥ कुंकुमपं[illegible]किलदेहां कुवलयजीवातुशावकवतंसां। को-
रक्तकमल वेणी
कनदशोणचरणां कोकिलनिक्वाणको[illegible]मलालापां ॥३२॥ वामांगसंलितचूलीं
नमाल्य मनोहरजला वेणी
४ [illegible] [illegible]कदंबमालिकाभरणां। मुक्तालवंतिकांचितमुग्धमौलिं कैमिलिंतचित्रकोड लीलिखित
दारां ॥३३॥ करविधृतकीरशावककलनिनदव्यक्तनिखिलनिगमार्थां। वामकुचसंगि-
वीणावादनसौख्यार्धमी[illegible]लिताक्षियुगां ॥३४॥ आपाटलांशुकधरामादिरसो-
ऊर्ध्वाम्नायादि पं चाम्नाय
न्मेषवासितकटाक्षां। आम्नायसारगुलिकामाद्यां संगीतमातृकां वंदे ॥३५॥ तस्य

© Dharmartha Trust J&K. Digitized by eGangotri

तेलि

चस्तु वर्णसालस्योत्तरतस्तरुणकुंकुमच्छायः। शमयतु मम संतापं सालो नवमः स्फुपु

पद
ष्पराग मयः॥३६॥ अन्तर्योरंतर वसुधाः प्रद्युम्नः प्रत्यग्रपुष्परागमयीः। सिंहासने

श्वरीमंत्रैश्चिंतनन निस्तंद्रसिद्धनीरं ध्राः॥३७॥ तत्सालोत्तर देशे तरुणजपाकिरणो उत्सुम

घोर णी शोणः। प्रशमयतु पद्मरागप्राकारो मम परानवं दशमः॥३८॥ अंतर मरुकृत

अनु
वासानन्दयोर पनीतचित्तवैमत्योन्द्रे। श्री के शीपद मक्तां श्चारणव जोन हर्निशंकलये

३९॥ सारंगवाह योजन दूरे संघटित केतन स्तस्या। गोमेदकेन रचितो गोपायतु मां

३
समुन्नतः सालः॥४०॥ वप्रद्वयांतरोर्व्यां बटुके विविधैश्च योगिनीवृंदैः। सततं समर्चि

व
तायाः संकर्षिण्याः प्रणौमि चरणाब्जे॥४१॥ तापसयोजनदूरे तस्य समुत्तुंगगोपुरो ३

पेतः। वांछापर्त्यै नवताद्वज्रमणीनिकर निर्मितो वप्रः॥४२॥ वरणाद्वितयांतरतो वाड

© Dharmartha Trust J&K. Digitized by eGangotri

कुर्वतः
सजुषो विहितमधुरसास्वादाः। रंभादिविबुधवेश्याः। रचयंतु महांतमस्मदानंदं॥४
३॥ तत्र सदाप्रवहंती तटिनीव जाह्नवी चिरं जीयात्। चटुलोर्मि क्रोडे नृत्यत्कलहंसी रसंघ
संघु कुलकलक्वणित पुष्टा॥ ४४॥ रोधसि तस्या रुचिरे वज्रेशी जयति वज्रकल्पाख्या। व
ज्रप्रदानतोषितवज्रिमुखत्रिदशविनुता चारित्रा॥ ४५॥ तस्योदीच्यां हरितिस्तव
कु कितसुखमावलीढविपदंतः। वैडूर्यैरत्नैरचितो वैमल्यं दिशतु चेतसो वरणः॥४६
॥ अधिमध्यमेतयोः पुनरंबा चरणावलंबितस्वांतान्। काकोदरादिनागान्कलया
मः किं च वलिमुखान्ननुजान्॥ ४७॥ गंधर्वहसंख्ययोजनदूरे गगनोर्ध्वजांघिकस्त
व स्यावासवमणिप्रणीतो वरणो बहुयंतु वेदुर्वीविशदं॥ ४८॥ मध्ये क्षोण्यामनुयोर्म
हेंद्रनीलात्मकानि चसरांसि। शांतोदरीसहायान्नृपाला नपि पुनः पुनः प्रणमः॥

© Dharmartha Trust J&K. Digitized by eGangotri

४९॥ आशुगयोजनदूरे तस्योर्ध्वं को[illegible]ति धवलितदिगंतः। मुक्ताविरचितगात्रो मुहुर
स्माकं मुदे भवतु पद्मः॥५०॥ आवत्योरधिमध्ये पूर्वस्यां दिशि पुरंदरः श्रीमान्॥ अत्र
ऐरावत उ पपति
मुविरोधिरूढो विभ्रमम स्माकमनिशमातनुतात्॥५१॥ तत्कोणे व्यजनस्रुक्तोम
रपात्र स्रुवान्नशक्तिधरः। स्वाहास्वधासमेतः स्रुखयतु मां हव्यवाहनः सुचिरं॥५
२॥ दक्षिणदिगंतरालेदंडधरो नीलनीरदच्छायः। त्रिपुरापदाब्जभक्तस्तिरयतुम
मानिखिलमंहसां निकरं॥५३॥ तस्योवपश्चिमायां दिशि दलितेंदीवरप्रभाश्यामः खि
पट
ड्गासियष्टिधारी खेदानपनयतु यातुधानो मे॥५४॥ तस्या उत्तरदेशे धवलांगो वि
पुलझषवरारूढः। पाशायुधात्तपाणिः पाशी विदलयतु पाषजालानि॥५५॥ वंदे त ४
मृग
दुत्तरहरित्कोणे वायुं चमरूढवरवाहं। कोरकिततत्ववोधान्गोरक्षप्रमुखयोगिमोवि

© Dharmartha Trust J&K. Digitized by eGangotri

नूतन मद्यं
मुहुः॥५६॥ तरुणीरिडाप्रथ्यानास्तिस्तोवातस्य तत्र कृतवासाः। प्रत्यग्रकापिशायनपान
नि
परिभ्रांतलोचनाः कलये॥५७॥ तत्क्षोकपूर्वेण्णागेधनरं ध्यायामिशेवधिकुलेशी। अ
पिमाणिभद्रमुख्यानं वाचरणावलंविनो यक्षान्॥५८॥ तस्यैव पूर्वसीमनि तपनी
पारचितगोपुरे नगरे। कात्यायनीसहायं कलये शीतांशुखंडचूडालम्॥५९॥ तत्पुर
षोडशावरणस्यलनाजस्तरुणचंद्रचूडालान्। रुद्राध्याये पठितान्रुद्राणीसहचरा
न्नजे रुद्रान्॥६०॥ पवमानसंख्ययोजनदूरे बालत्रणमेचकस्तस्या। सालो मरकतर
चितः संपदमचलां श्रियं च पुष्णातु॥६१॥ आवर्तियुग्मांतरतो हरितमणीनिवहमे
चके देशे। हाटककृतालीविपिनं हालामदपूरितविटपमाकलये॥६२॥ तत्रैव मंत्रिणी
चंचलः वाराही
गृहपरिमाणांतरदलकेतनं सदनं मरकतसौधमनोज्ञं दद्यादायं षिदंडनाथायाः॥६३

© Dharmartha Trust J&K. Digitized by eGangotri

३।। सदने तत्र हरिन्मणिसंघटिते मंडपे शतस्तंभे । कार्त्त(सुवर्ण)स्वरमयपीठे कनकमयांबु
रुहकर्णिकामध्ये ।। ६४ ।। बिंदुत्रिकोणवर्त्तुलषडस्रवृत्तद्वयान्विते चक्रे । संचारि
णी दशोत्तरशतारपद्मनृपराजकमलकलहंसी ।। ६५ ।। कोलवदना कुशेशय(कमल)नयना
कोकारि(चक्रवाकारिणा चंद्रेण)मंडितशिखंडा ।। संतप्तकांचनाभा संध्यारुणचेलसंवृतनितंबा ।। ६६ ।। S
हलमुसलशंखचक्रांकुशपाशाभयवरस्फुरितहस्ता । कुलंकषा(परिपूर्णा)नुकंपा कुंकुमपं
कि(पंकिल)जंबालितस्तनाभोगा(विस्तृतौ) ।। ६७ ।। ध्वस्तोन्मिति दूरावर्त्तो शेषावलग्न(शेषराव … कटि भागः)कमनीया । आर्त्ता
लीशुमदाज्ञीवार्त्तालीनवलुवांछितार्थाय ।। ६८ ।। तस्याः परितो देवीः स्वप्नेश्युन्मद
नन्नैरवीनुरव्याः । प्रणमत जंभिन्याद्यान्नैरववर्गो श्च हेतुकप्रमुखान् ।। ६९ ।। पूर्वो
क्त संख्ययोजनदूरे पूर्णा(सूर्य)भ्युपारलस्तस्या । विद्रावयतु मदार्त्तिं विद्रुमसालो विशं ५

© Dharmartha Trust J&K. Digitized by eGangotri

स्थल

कटद्वारः॥७०॥आवरणयोरहर्निशमंतरमुद्भ्रमोप्रकाशशालिन्यां॥आसीनमं

बुजासनमग्निनवसिंदूरगौरमहमीडे॥७१॥वरणस्यतस्यमारुतयोजन

तोविपुलगोपुरद्वारः॥सालोनानारत्नैःसंघटितांगःक्रुधीष्टमदमीष्टं॥७२

॥अंतरकक्ष्यामनयोरविरलशोभापिचंडिलोद्देशं॥माणिक्यमंडपाख्यांमह

तीमधिहृदयमनिशमाकलये॥७३॥तत्रस्थितंप्रसन्नंतरुणतमालप्रवालड

किरणांकर्णावलंविकुंडलकंदलितादृमौक्तिकवलितकपोलं॥७४॥शो

णाधरंशुचिस्मितमैणांकवदनमेधमानरूपंमुग्धेणमदविशेषकमु

द्रितनिटिलेंदुरेखिकारुचिरं॥७५॥नीलोकदलसहोदरनयनांचै

र्जघटितमनसिजाकृतंकमलाकठिणपयोधरकस्तूरीघुसृणपंकिलोर

© Dharmartha Trust J&K. Digitized by eGangotri

लवि

विधुसमानवर्णं रणचर

रस्कं ॥७६॥ चांपेयगंधिके श्यंशं पाशसृणिचारिकौशेयां श्रीवत्सकौस्तुभधरं श्रित

सेवकरक्षासमर्थपादाब्जं

रणचर जनरक्षाधुरीणाब्जं ॥७७॥ कंबुसुदर्शनविलसत्करपद्मं कंठलोलवनमालं मु

राजी बीज

बकुकुंदमोक्षफलदं मुकुंदमानंदकंदमवलंबे ॥७८॥ तद्बहिरणोत्तरभागे ताराप

तिबिंबचुंबिनिजशृंगः। विविधमणीजालघटितो वितरतु सालो विनिर्मलो धिष

णां ॥७९॥ प्राकारं द्वितयांतरकक्ष्यां पृथुरत्ननिकरसंकीर्णां नमत सहस्रस्तंभक

मंडपनाम्नातिविश्रुतां भुवने ॥८०॥ प्रणम तत्र भवानीसहचरमीशानबिंदुखंड

सुंदरी

धरं। शृंगारनायिकामनुशीलनभाजोपि मंगिनंदिमुखान् ॥८१॥ तस्यैणवाह ॐ

वंदे योजनदूरे दीप्रमनोमयं वप्रां अंकुरि मणिकिरणाघांमंतरकक्षां च निर्मलामन

यो ॥८२॥ तत्रैवामृतवापीतरलतरंगावलीढतटयुग्मां। मुक्तामयकलहंसी

© Dharmartha Trust J&K. Digitized by eGangotri

मुद्रितकनत्कारविंदसंदोहां [समूहां]॥८३॥ शक्रोपलमयस्तंभीसंजीतोन्मेषघोषितदिगंतां
।कांचनमयूखविलसत्कारंडवखंड [पक्षिसमूहः] ताडवमनोज्ञां॥८४॥ कुरुविंद [मणिविशेषः] त्मकहल्लक [रक्तकमल]
कोरकसुषुमासमुहपाटलितां। कलये सुधास्वरूपां कंदलितामंदकेरवामोदां [मकरंद]
॥८५॥ तापिकांतरालेतरलेमणिपोतकैः सीम्नि विहरंतीं। सिंदूरपाटलांगीसितकि
रणांकूरकल्पितवृतंसां॥८६॥ पर्वेंदुबिंबवदनां पल्लवशोणाधरस्फुरितहासां।
कुटिलकवरीकुरंगी [हरिणी] शिशुनयनां कुंडलस्फुरितगंडां॥८७॥ निकटस्थपोतनिल
याः शक्तीः शय [हस्त] विधृतहेमशृंग [पिचका] जलैः। परिषिंचंतीं परितस्तारां तारुण्यगर्वितां
वंदे॥८८॥ प्रागुक्तसंख्ययोजनदूरे प्रणमामि बुद्धिमयसालं। अनयोरंतरकं
क्ष्यामष्टापद [सुवर्ण] पुष्टमेदिनीरुचिरां॥८९॥ कादंबरी [मद्य] निधानां कलयाम्यानंदवाऽ
[रत्न]

© Dharmartha Trust J&K. Digitized by eGangotri

पिकांतस्थां।शोणाश्मनिवहनिर्मितसोपानश्रेणिशोभमानतटां॥१०॥माणिक्य
तरणिनिलयांमध्येतस्याःमदारुणकपोलां॥अमृतेश्वीत्यभिधानांमंतःकल
यामिवारुणीदेवीं॥११॥सोवर्णकेनिपातनहस्ताःसौंदर्यगर्विताद्व्यः।तत्परि
8 तस्तरिभाजोवितरंत्वस्माकमाशिषांवृद्धिं॥१२॥तस्यपरषदश्चयोजनदूरेहंकार
म सालमतितुंगंमं॥वंदेतयोश्चमध्येक्षांवधमानमलयपवमानां॥१३॥विनुमोवि प्ह
मर्शीवापींसोमृमसुधास्वरूपिणींतत्र॥वेलातिलंघिवीचीकोलाहलभरितकूड
लवनवाटीं॥१४॥तत्रैवसलिलमध्येतापिच्छदलप्रपंचसुषुमाभां।श्यामलकंचु
कलसितांश्यामामविंबुंवरहरास्यां॥१५॥आभुग्नमसृणचित्त्रीहसितायुग्मंड ८
रकामुकविलासां।मंदस्मितांचितमुखीमणिमयताटंकमंडितकपोलां॥१६॥

© Dharmartha Trust J&K. Digitized by eGangotri

कू नान्
।।कुरुविंदतरणिनिलयांकुलाचलस्पर्धिचनमन्मध्यां।।कुंकुमविलिप्तगात्रींकुरु
कुल्लांमनसिकुर्महेसततं।।९६।।तत्सालोत्तरभागेचिंतैमयंवप्रमाश्रयेदीप्तं।।म
ध्यंचविपुलमनयोर्मन्येविश्रांतमातपोद्गारं।।९८।।तत्रकुरुविंदपीठेतामरसेक
नककर्णिकाघटिते।आसीनमरुणवाससमम्लानप्रसवमा[illegible]कानरणं।।९९ लि
।।चक्षुष्मतीप्रकाशनशक्तिच्छायासमारचितकेलिम्।माणिक्यमुकुटरम्यं
मन्येमार्त्तंडभैरवंहृदये।।१००।।इंदुमयसालमीडेतस्योत्तरतस्तुषारगिरिगौरं
।अत्यंतशिशिरमारुतमनयोर्मध्यंचचंद्रिकोद्गारं।।१०१।।तत्रप्रकाशमानंतारानि
करैःपरिष्कृतोद्देशं।अमृतमयकांतिकंदलमंतःकलयामिकुंदसितमिंदुं।।१०२।।
शृंगारसालमीडेशृंगोद्यसितंतदुत्तरेभागे।मध्यस्थलेतयोरपिमहिताश्शृंगार

© Dharmartha Trust J&K. Digitized by eGangotri

परितांपरिखां॥३॥तत्रमणिनौस्थितास्मिस्तपनीयारक्तशोभिहस्ताभिः।शृंगार
देवताभिः सहितंपरिखाधिपं भजेमदनं॥४॥शृंगारवररणवर्यस्योत्तरतः सकलवि
बुधसंसेव्यं।चिंतामणिगणरचितंचिंतां दूरीकरोतु मे सदनं॥५॥मणिसदनसाल
योरधिमध्यं दशतालभूमिरुहदीर्घैः।पर्णैः पयोदवर्णैर्युक्तां कांडैश्च योजनोत्तुंगैः
॥६॥मिलितैस्तालीपंचकमालैर्मिलितां च केसरकदंबैः।संततगलितमरंदस्रोतो
निर्यन्मिलिंदसंदोहां॥७॥पाटीरपवनबालकधाटीनिर्यत्परागपिंजरितां।पद्मा
टवीं भजामः परिमलकल्लोलपक्ष्मलोपांतां॥८॥दव्यर्घ्यपात्रधारी तस्याः पूर्वदिशि
दशकलायुक्तः।वलयितमूर्त्तिर्भगवान्वह्निः क्रोशोन्नतश्चिरं पायात्॥९॥तत्राध्या
रे दिव्यांपात्रीरूपः प्रभाकरः श्रीमान्॥द्वादशकलासमेतो ध्वांतंममबहुलमांतरंभि

© Dharmartha Trust J&K. Digitized by eGangotri

ध्यात्॥१०॥तस्मिंदिने शपात्रे तरंगितामोदममृतमयमर्घ्यं। चंद्रकलात्मकममृतं सं
द्धीकुर्यादमंदमानंदं॥११॥अमृते तस्मिन्नभितो विहरंत्यो विविधमणितरणिभा
जः। षोडशकलाः सुदंशोः शोकादुत्तारयंतु मामनिशं॥१२॥तत्रैव विहृतिभाजो ध्यात
मुखानां चकारणेशानां। भवनानिशर्मणेवो भवंतु भास्वत्स्वप्याादि रूपिकास्ताः श
मयंत्वखिलाः कलाश्च संतापं॥१३॥कीनाशवरुणकिन्नरराजदिगंतेषु रत्नगेहस्य
।क[illegible]न्यजस्रं कलयं त्वापुष्यमध्ये पात्राणि॥१४॥पात्रस्थलस्य पुरतः प
द्मारमणविधिपार्वतीशानां। [illegible] भवनानिशर्मणे [illegible] भवंतु भासा प्रदीपितजगंति॥१५
॥सदनस्यानलकोणे सततं प्रणमामि कुंडमाग्नेयं। तत्र स्थितं च वह्निं तरलशिखाज
टिलमंबिकाजनकं॥१६॥तस्याशारदिष्ठिता दशरत्नपरीतं सुपर्वनवकाद्यं। चड

© Dharmartha Trust J&K. Digitized by eGangotri

क्रात्मकं शतांगं दशयोजनमुन्नतं भजे दिव्यं ॥१७॥ तत्रैव दिशि निषण्णं तपनीयध्वजऽ
परंपराभिष्टां ॥ रथमपरं च मनवान्यारचयामो मनसि रत्नमयचक्रं ॥१८॥ भवनस्य
स्य वायुभागे परिष्कृतो विजयवैजयंतीभिः ॥ रचयतु मुदं रथेंद्रः सचिवेशा
न्या समस्तवं घायाः ॥१९॥ रुद्रदिशि रत्नधाम्नो रुचिरपताकाप्रपंचकंचुकितं
कुर्मो हृदयमनिशं क्रोडास्यायाः शतांगमत्युच्चं ॥२०॥ परितो देवीधाम्नः प्र
णीतवासामनुस्वरूपिण्यः ॥ कुर्वंतु रश्मिमालाकृतयः कुशलानि देवतानिखि
लाः ॥२१॥ प्राग्द्वारस्य भवानीधाम्नः पार्श्वद्वयी रचितवासौ मातंगी किटिमुख्यौ
मणिसदने भावयामि चिरं ॥२२॥ योजनयुग लाभोगातं क्रोशं परिणाह १०
यामित्याः ॥ चिंतामणिगृहभूमिर्जीयादाम्नायमयचतुर्द्वारा ॥२३॥ द्वारे द्वारे

२ द्वितय

© Dharmartha Trust J&K. Digitized by eGangotri

ध्याम्नः पिंडीभूतानवीनबिंबानाः विद्धतु विपुलां कीर्त्तिं दिव्यां लौहित्यसिद्ध
योद्देव्याः ॥२४॥ मणिसदनस्यांतरतो महनीये रत्नवेदिकामध्ये । बिंदुप्र
यचक्र धिचित्तमीडे पीठानामुपरि विरचितावासां ॥२५॥ चक्राणां सकौलानां प्र
म्नि थममधःसीमफलकवास्तव्याः । अणिमादिसिद्धयो मामवंतु देवीप्रभास्व
रूपिण्याः ॥२६॥ अणिमादिसिद्धफलकस्योपरि हरिणांकखंडकृत
चूडाः । मन्द्रं पक्ष्मलयंतु ब्राह्मीप्रमुखा विश्वमातरोऽस्माकं ॥२७॥ तस्योपरि म
णिफलके तारुण्योत्तुंगपीनकुचभाराः । संक्षोभिणीप्रधाना श्रांतिं विद्रा
वयंतु दशमुद्राः ॥२८॥ फलकत्रयस्वरूपे पृथुले त्रैलोक्यमोहने चक्रे । दीव्यं दे
सु तु प्रकटाख्यास्तासां कर्त्री च भगवती त्रिपुरा ॥२९॥ तदुपरि विपुले धिष्ण्ये त

© Dharmartha Trust J&K. Digitized by eGangotri

रलहस्तस्तरुणकोकनदभासः। कामाकर्षिणिकाद्याः कलयेदेवीः कलाधर
शिखंडाः॥३०॥ सर्वाशापरिपूरकचक्रेस्मिन्गुप्ततरयोगिनीसेव्या। त्रिपुरेशी म
मदुरितं नुद्यात्कंठावलंबिमणिहारा॥३१॥ तस्योपरि मणिपीठं ताम्रांभो
रुहदलप्रभाशोणाः। ध्यायाम्यनंगकुसुमाप्रमुखा देवीश्च विधृतकूर्पाऽ
साः॥३२॥ संक्षोभकारकेस्मिन् चक्रे श्रीत्रिपुरसुंदरी साक्षात्। गोप्त्रीगु
प्ततराणां गोपायतु मां कृपार्द्रया दृष्ट्या॥३३॥ संक्षोभिणीप्रधानाः शक्तीऽ
स्तस्योर्ध्वे वलयं कृतवासाः। आलोलनीलवेणीरंतः कलयामि यौवनोन्म
त्ताः॥३४॥ सौभाग्यदायके स्मिंश्चक्रे श्रीत्रिपुरवासिनी जीयात्। शक्तीश्चऽ ११
संप्रदायाभिधाः समस्ताः प्रमोदयंत्वनिशं॥३५॥ मणिपीठोपरि तासां मह

© Dharmartha Trust J&K. Digitized by eGangotri

तस्या

ति चतुर्हस्तविस्तृते वलये संततविरचितवासाः शक्तीः कलयामि सर्वसिद्धिः
प्रमुखाः ॥३६॥ सर्वार्थसाधकाख्ये चक्रे मुष्मिन्समस्तफलदात्री। त्रिपुराश्रीमे
मकुशलं दिशताद्दशाली योगिनीसेव्या ॥३७॥ तां सांनिलयस्योपरि धिष्ण्ये कौ
सुंभकंचुकमनोज्ञाः सर्वज्ञाद्या देव्यः सकलाः संपादयंतु मम कीर्तिम् ॥३८
॥ चक्रे समस्तरक्षाकरनाम्न्यस्मिन्समस्तजनसेव्यां। मनसि निगर्भोसहितां
मन्ये श्रीत्रिपुरमालिनीं देवीम् ॥३९॥ सर्वज्ञासदनोपरि चक्रे विपुले समाक
लितगेहाः वंदे वशिनीमुख्याः शक्तीः सिंदूररेणुशोणरुचः ॥४०॥ श्रीसर्वरोग
हाराख्ये चक्रेस्मिंस्त्रिपुरपूर्विकां सिद्धां। वंदे रहस्यनाम्ना वेद्याभिः शक्ति
भिः सदा सेव्याम् ॥४१॥ वशिनीगृहोपरि स्याद्विंशतिहस्तोन्नते महापीठा स

ललि

मयंत्रशत्रुवर्गदंशस्तत्राण्यस्तारिणिशैवदंपत्योः॥४७॥शस्त्रसदनोपरिष्टाद्दल
चेबलवैरिरत्नसंघटितो।कामेश्वरीप्रधानाः कलयेद्देवीः समस्तजनवंद्याः
॥४८॥श्रीचक्रेत्र सर्वसिद्धिप्रदनामनि सर्वे(सिद्धि)फुल्लदाश्रीत्रिपुरांबावतु सततं पराप
12 ररहस्ययोगिनीसेव्या॥४९॥कामेश्वरीगृहोपरिवलयेविविधमनुसंप्रदा
यज्ञाः चत्वारोयुगनाथाजयंतुमित्रेशपूर्वकाग्गुरवः॥५०॥नाथनवनोपरि
४ ना ष्टान्नारैरत्नमयमेदुरेपीठे।कामेश्याद्यानित्याः कलयंतुमुदंतिथिस्वरूपि
ण्यः॥५१॥नित्यासदनस्योपरिष्टात्तासांसर्वानंदमयनाकमकेबिंदौ।पंचब्र
ह्माकारंमंचंप्रणमामिमणिगणाकीर्णं॥५२॥ निर्मलमणिनिवहविरचि १२
तधिष्ण्याकुशलंबडंगदेव्यः कलयंत्वस्माकमुत्तरलनेत्राः॥५३॥सदनस्योपरि×

© Dharmartha Trust J&K. Digitized by eGangotri

परितो मणिमंचस्य प्रलंबमानाभियंत्रितपाशैः। मायामयीयवनिका मम दुरितं

हरतु मेचकच्छाया॥४९॥ मंचस्योपरि चंचन्मच्छीपुन्नागमालिकाभरितं। हरि

गोपमयवितानं हरतात्तापस्य मनिशमस्माकं॥५०॥ पर्यंकस्यं भजामः पादान्

न्विंबांबुदेंदुहेमरुचः॥ अजहरिरुद्रेशमयाननलासुरमारुतेशकोणस्थान्॥

५१॥ फलकं सदाशिवमयं प्रणौमि सिंदूररेणुकिरणाभं। आरम्यांगेशानां स

दनीत्कलितं वररत्नसोपानं॥५२॥ पद्मोपधानजँडुक [illegible] चतुष्पयस्फुरितपाट ५

लास्तरणं पर्यंकोपरि घटितं पातु चिरं हंसतूलशयनं नः॥५३॥ तस्योपरि नि

वसंतं तारुण्यश्रीनिषेवितं सततं। आवर्तफुल्लरक्तकमल [illegible] मरीचिकापुंज

मंजुलच्छायं॥५४॥ सिंदूरशोणवसनं शीतांशुस्तबकचुंबितकिरीटं। कुंकु

© Dharmartha Trust J&K. Digitized by eGangotri

हद्ध

मतिलकमनोज्ञं कुंटिलालिकहसितकुमुदबंधुशिशुं ॥५५॥ पूर्णेंदुबिंबवदनं
फुल्लसरोजातलोचनत्रितयांतरलापांगतरंगितशफरांकनशास्त्रसंप्र
दायार्थं ॥५६॥ मणिमयकुंडलपुष्यन्मरीचिकल्लोलमंसलकपोलं ॥ विद्रुम
सहोदराधरविस्फुरत्स्मितकिशोरसंचारं ॥५७॥ आमोदिकुसुमशे
13 खरमानीलभ्रूलतायुग[redacted]मनोज्ञां ॥ वीटीसौरभवीचिद्विगुणितवक्त्रारविं
दसौरभ्यं ॥५८॥ पाशांकुशेक्षुचापप्रसवशरस्फुरितकोमलकराब्जां ॥ कांड
श्मीरपंक्तिलोजं कामेशं मनसि कुर्महे सततं ॥५९॥ तस्यांकमणिविनिष
ण्णांतरुणकदंबप्रसूनकिरणाभां ॥ शीतांशुखंडचूडां सीमंतन्यस्तसांद्रस १३
सिंदूरां ॥६०॥ कुंकुमलेपनमास्वज्जितटोंकुटिलतरचिल्लिकायुगलां ॥ ना

© Dharmartha Trust J&K. Digitized by eGangotri

लीकतुल्यनयनांनासांचलकलितमौक्तिकाभरणां॥६१॥अंकुरितमंदहा
सामरुणाधरकांतिविजितबिंबानां॥कस्तूरीकेसरीयुतकपोलसंक्रांतक
नकताटंकां॥६२॥कर्पूरसांद्रवीटीकवलितवदनारविंदकमनीयां॥कंबुस
होदरकंठप्रलंबमानाच्छमौक्तिककलापां॥६३॥कल्हारदामकोमलभुजयु
गलस्फुरितरत्नकेयूरां॥करपद्मतलविलसत्कांचनमयकटकवलय
संदोहां॥६४॥पाणिचतुष्टयविलसत्पाशांकुशपुंड्रचापपुष्पास्त्रांरूलंकष
कुचशिखरांकुंकुमकर्दमितरत्नकूर्पासां॥६५॥अणुदायादवलग्नामंबुद
शोभानासनाभिरोमलतां॥माणिक्यखचितकांचीमरीचिकाक्रांतमांसलनितं
बां॥६६॥सरलोरुकांडयुगलांजंघाजितकामजैत्रतूणीरां॥प्रपदपरिभूत

© Dharmartha Trust J&K. Digitized by eGangotri

कूर्मीपल्लवसख्यायपदयुगमनोज्ञां॥६७॥कमलभवकंजलोचनकिरीटरत्नांशु
रंजितपदाब्जां॥उन्मस्तकानुकंपामुत्तरलोपांगपोषितानंगां॥६८॥आदिमरसा
वलंबामनिदंप्रथमोक्तिवल्लरीकलिकां॥आब्रह्मकीटजननीमंतःकलयामिसुंदरी
मनिशं॥६९॥कस्तुक्षितौमदीयान्वस्तुतोतुंशिवांकवास्तव्यां॥अस्तुचिरंतनसुकृ
तैःप्रस्तुतकार्यायतन्ममपुरस्तात्॥७०॥प्रभुसंमितोक्तिगम्यंपरशिवोत्संगतुंग
पर्यंकां॥तेजःकिंचनदिव्यंपुरतोमेभवतुपुंड्रकोदंडं॥७१॥मधुरिमभरितशरा
संमकरंदस्यंदिमार्गणोदारं॥केरविलीविटचंडंकेवल्यायास्तुकिंचनमहो
न:॥७२॥अक्षुद्रमिक्षुचापंपरोक्षमवलग्नसीमनिप्रत्यक्षांक्षपयतुनःक्षेमेतरदु ३।१७
क्षरथप्रेमपक्ष्मलंतेजः॥७३॥भंगरुचिसंगरकरापांगंश्रंगारतुंगमरुणांगं॥

© Dharmartha Trust J&K. Digitized by eGangotri

मंगलमर्मगुरं मे घटयतु गंगाधरांगसंगिमहः॥१७४॥प्रपदजितकूर्ममर्मितक
रुणं मम मे रूचिनिर्मथनदेहां॥श्रितमममेवमेशं नो: किंचन नः शर्मनमेनिर्मोला॥१७
५॥कालकुरलालिकालिमकंदलविजितालिविधरतमणिबालिामि लतुहृदि पु
लिनजघनं बहुलितगरलि गल केलि किमपि महः॥१७६॥कुंकुमतिलकितनाला
कुरबिंदच्छायपाटलदुकूला॥करुणापयोधिवेलाकाचनचित्ते करोतु मे लीला॥
१७७॥पुष्पंधयरुचिवेण्यः पुलिनाभोगत्रपाकरश्रेण्यः।जीयासुरिन्दुबाण्यःकाश्चन
कामारिकेलिसाक्षिण्यः॥१७८॥तपनीयांशुकवांस्मितद्राक्षामाधुर्यनास्तिकवचोऽ
सौ॥कतिचनशुचं महांसि क्षपयन्तु कपालितोषितमनांसि॥१७९॥असितकचमा
यताक्षं कुसुमशरं कूलमुद्वहकूपार्दे॥आदिमरसाधिदेवतमंतःकलये हरांक

© Dharmartha Trust J&K. Digitized by eGangotri

वासिमहः॥८०॥ कर्णोपान्ततरंगितकटाक्षनिस्पंदच्छन्नरूपां॥ कामेश्वरोकनिल
यां कामपि विद्यां पुरातनीं कलये॥८१॥ अरविंदकांत्यरुंतुदविलोचनद्वंद्वसुं
दरमुखेंदुः। कंदलितमंदिरमंतःपुरमैंदुशेखरं वंदे॥८२॥ बिंबनिकुरुंब
मिविडंबविडंबरे च्छायं भैबर [illegible]। कंबुगलमंबुदकचं बिंबोकं कमपि चुं
बतु मनो मे॥८३॥ शंपारुचिं नरगर्हासंपादककांतिकवचितदिगंतां। सिद्धांतंनि
गमानां शुद्धांतं कमपि शूलिनः कलये॥८४॥ उद्यद्दिनकरशोणानुत्पलवंधु
स्तनंधयापीडान्। आकरकलितपुंड्रचापान्कलयामि शुभान्कपर्दिनः प्राणान्
॥८५॥ रशनालसज्जघनया रसनाजीवातुचापभासुरया। घ्राणापुष्करशा
रया घातं चित्तं कयापि वासनया॥८६॥ सरसिजसहयुद्धदृशा शीपालतिका

© Dharmartha Trust J&K. Digitized by eGangotri

१५

सनाभिविग्रहयांभासोकयापिचेतोनासामरिशोभिवदनयाभरितं॥८७॥
नवपा — वकान्तसिचयावृतयागजयानयादयापरयाध्वतयाभिनीशकल
याधियाकयापिक्षतामयाहिवयं॥८८॥अलमलमकुसुमबालेर बिंवशोलो
रपुंड्रकोदंडैः।अकुमुदबांधवचूडैरन्यैरिहजगतिदेवतंमन्येः॥८९॥कुव
लयसदृक्षनयनैःकुलगिरिकूटस्थबंधुकुचभारैः।करुणागंधिकटाक्षैः
कवचितचित्तोस्मिकतिपयेःकु[illegible]कैः॥९०॥नतजनसुलभायनमोनाली
कसनाभिलोचनायनमः।नंदितगिरिशायनमोमहसेनवनीपपाट
लायनमः॥९१॥कादंबकुसुमदाम्नेकायच्छायाकरणाघरितहेम्नोषीम्नो
श्चिरंतनगिरांनम्नेकस्मैचिदाहृयेप्रणतिमः॥९२॥कुटिलकवरीनरे

© Dharmartha Trust J&K. Digitized by eGangotri

भ्यः कुंकुमसब्रह्मचारिकिरणेभ्यः। कलंकयस्तनेभ्यः कुम्भेः प्रणतिकुलाद्रि
कुतुकेभ्यः।९३। कोकनदशोणवसनात्कोमलांकुरलाविजितशैवालात्। उ
त्पलसुगंधिनयनादुररीकुर्मोन देवतादन्यत्॥९४॥ आपाटलाधराणामा
नीलस्निग्धबर्बरकचानां। आम्नायजीवितानामाकूतानां हरस्य दासोस्मि।
।९५॥ पुंखितविलासहासस्फुरितासुपुराहितांकनिलयासु। मग्नं मनोम
दीयं कास्वपि कामारिजीवनाडीषु॥९६॥ ललिता पातु शिरो मे ललाटमंबा
च मधुमतीरूपा। भ्रूयुग्मं च भवानी पुष्पशरा पातु लोचनद्वंद्वं॥९७॥ पाया
न्नासां बाला सुभगा दंतांश्च सुंदरी जिह्वां। अधरोष्ठमादिशक्तिः चक्रेशी १६
पातु मे चिरं चिबुकं॥९८॥ कामेश्वरी च कर्णौ कामाक्षी पातु गंडयोर्युगलं। शृंगा

© Dharmartha Trust J&K. Digitized by eGangotri

रनायिका हृदनं सिंहासनेश्वरी वजलं ॥१९९॥ स्कंदप्रसूश्च पातु स्कं
धौ बाहू च पाटलांगी मे। पाणी च पद्मनिलया पायादनिशं नखावली विजया
॥२००॥ कोदंडिनी च वक्षः कुक्षिं चाव्यात्कुलाचलतनूजा। कल्याणी च वल
ग्नं कटिं च पायात्कलाधरशिखंडा ॥२०१॥ ऊरुद्वयं च पायादुमामृडानी च
जानुनी रक्षेतां। जंघे च षोडशी मे पायात्पादौ च पाशसृणिहस्ता ॥२०२॥ प्रातः
पातु परा मां मध्याह्ने पातु मणिगृहाधीशा। शर्वाण्यवतु च सायं पायाद्रात्रौ च भैर
वी साक्षात् ॥२०३॥ भार्यां रक्षतु गौरी पायात्पुत्रांश्च बिंदुगृहपीठा। श्रीविद्या
च यशो मे शीलं चाव्याच्चिरं महाराज्ञी ॥२०४॥ पवनमयि पावकमयि क्षोणीमयि
गगनमयि कृपीटमयीशशशिमयि रविमयि दिङ्मयि समयमयि प्राणम

© Dharmartha Trust J&K. Digitized by eGangotri

यिशिवे पाहि॥२०५॥ कालिकपालिनि भैरवि मातंगि पंचमि त्रिपुरे। वा
न्द्रे विंध्यवासिनि बालेभुवनेशि पालय चिरं मां॥२०६॥ अभिनवसिंदूराभामं
बत्वां चिंतयंति ये हृदये उपरि निपतंति तेषामुत्पलनयनाकटाक्षकल्लोलाः
॥२०७॥ वर्गाष्टकमिलिताभिर्वशिनीमुख्याभिरावृतां भवतीं। चिंतयतां सितव
र्णां वाचो निर्यांत्ययत्नतो वदनात्॥२०८॥ कनकशलाकागौरीं कर्णव्यालोल
कुंडलद्वितयां। प्रहसितमुखीं च भवतीं ध्यायंतो ये त एव भूधनदाः॥२०९
॥शीर्षांभोरुहमध्ये शीतलपीयूषवर्षिणीं भवतीं। अनुदिनमनुचिंतयतामा कु
युष्यं भवति पुष्कलमवन्यां॥२१०॥ मधुरस्मितं मदारुणनयनां मातंगकुं १७
भवक्षोजां। चंद्रावतंसिनीं त्वां सविधे पश्यंति सुकृतिनः केचित्॥२११॥ ल

© Dharmartha Trust J&K. Digitized by eGangotri

लिताया:स्तवरत्नं ललितपदाभिः प्रणीतमार्याभिः। प्रतिदिनमवनौ पठतां फ
लानि वक्तुं प्रगल्भते सैव॥२१२॥ इति श्री दूर्वासाकृतं ललितास्तवरत्नं समाप्
तं॥ ॥श्री ललितादेव्यार्पणमस्तु॥ ॥लिखितमिदं काश्यां नद्रकाली समपे
पञ्जोपाख्य गौरीदत्तेन श्रीमन्महात्रिपुरसुंदरी गुरुभ्यो नमः॥ संवत्
१९८३ श्रावण कृष्ण धरवौ समाप्तमिदं श्री गुर्वार्पणमस्तु श्रीरस्तु॥ श्री

18

© Dharmartha Trust J&K. Digitized by eGangotri

ललितास्तव

२९२ श्लो॰ १०

© Dharmartha Trust J&K. Digitized by eGangotri